IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# वैखानसश्रौतसूत्रे उखाग्निविचारः

**Dr. DSV Jagannatha Sharma M.A, Ph.D**

Assistant Professor

Kalpa Department, S.V. Vedic University,Tirupati

यज्ञो वै विष्णुः।

**यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।**

**निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्।**

श्रौत-स्मार्तयज्ञः जगतः मूलाधारः। यज्ञः एव साक्षात् विष्णुः। यज्ञो वै विष्णुः इति वयं जानीमः। विश्वेऽस्मिन् विद्यमानसमस्तधर्मकर्मज्ञानविद्यायाः प्राणभूता वेदाः। सर्वज्ञानमयो हि सः। सर्वज्ञानस्वरूपवेदराशिः जगन्निर्माणकाले प्रणवरूपे विद्यमानमासीत्। प्रणवः सर्ववाङ्मयः। तं वेदराशिं महर्षिव्यासेन चतुर्धा व्यकल्पयत ऋग्यजुस्सामार्थवभेदात्मकाः। विद्ज्ञाने धातोः भावकर्मकरणार्थे घञ् प्रत्ययकृते वेदशब्दः सम्पन्नः ।

**विदन्ति जानन्ति विद्यन्ते भवन्ति विन्दन्ति लभन्ते विन्दन्ति विचारयन्ति सर्वे मनुष्याः सत्यविद्यां यैर्येषु वा तथा विद्वांश्च भवन्ति ते वेदाः।**

वेदाः अस्माकं अमूल्यनिधयः। वेदेषु सर्वं विद्यते। सनातनसंस्कृतज्ञाः जीवनेऽस्मिन् आवागमनप्रकल्पान्मुक्त्यर्थं पुरुषार्थपूर्वकजीवनाय च प्रयासरताः वर्तन्ते।

**उक्तञ्च -**

**इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकम् उपायं यो ग्रन्थो वेदयति स वेदः"1॥**
(तैत्तिरीयभाष्यभूमिका)

**आद्यन्तप्रमाणाः वेदाः।**

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**

**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता॥2॥**

**(वैदिकसाहित्या का इतिहास)**

वेदवैशिष्ट्यविषये नैकग्रन्थेषु वर्णनं प्राप्यते।

**यथा –**

**वेदेन वै देवा असुराणां वित्तं वेद्यमविन्दत तद्वेदस्य वेदता।**

**वेदशास्त्रार्थं तत्वज्ञो यत्र कुत्राश्रमे वसन्।**

**इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते।**

ऋग्यजुस्सामार्थवभेदात्मकाः वेदाः। एते ब्राह्मण-आरण्यक-उपनिषत्-षडङ्गादि-सहितं बहुविस्तृतया वैदिकसाहित्यं सम्प्रत्युपलभ्यते। ।

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्**

**तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते॥**

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसामिति ।**

**ज्योतिषामयनं चैव षडंगो वेद उच्यते ॥**

**षडङ्गेषु कल्पशास्त्रस्य बहुवैशिष्ट्यं वर्तते।**

षडङ्गेषु कल्पशास्त्रमतीव वैशिष्ट्यपूर्णं भजते।

**कल्प्यते विधीयते असौ । कृप् +कर्म्मणि घञ् इति। कल्पशब्दस्य व्युत्तपत्तिर्वर्तते।**

**एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः ।**

**अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः"**

**कल्पो वेदविहितानां कर्मणमानुपूर्व्येण कल्पनाशास्त्रम्।**

कल्पशास्त्रेषु श्रौत-स्मार्त-गृह्य-शुल्बसूत्राणि च समायान्ति।

**चतुर्वेदस्य श्रौतसूत्राणि –**

**ऋग्वेदीयश्रौतसूत्रम् -**

1. शाङ्खायनश्रौतसूत्रम्
2. 2. आश्वलायनश्रौतसूत्रम्

यजुर्वेदीयश्रौतसूत्रम् - अस्मिन् वेदे शुक्ल-कृष्णात्मकं भेदं वर्तते।

शुक्लयजुर्वेदस्य कात्यायनश्रौतसूत्रम्   एकमेव।

**कृष्णयजुर्वेदश्रौतसूत्रम्**

1. बौधायनश्रौतसूत्रम्
2. भारद्वाजश्रौतसूत्रम्
3. आपस्तम्बश्रौतसूत्रम्
4. मानवश्रौतसूत्रम्
5. वाराहश्रौतसूत्रम्
6. हिरण्यकेशीश्रौतसूत्रम्
7. वैखानसश्रौतसूत्रम्

**सामवेदीय श्रौतसूत्रम्**

1. आर्षेयकल्पसूत्रम्
2. क्षुद्रकल्पसूत्रम्
3. लाट्यायनश्रौतसूत्रम्
4. द्राह्यायणश्रौतसूत्रम्
5. जैमिनीयश्रौतसूत्रम्

**अथर्ववेदीय श्रौतसूत्रम् -** वैतानश्रौतसूत्रम्

एतेषु श्रौतसूत्रेषु वैखानसश्रौतसूत्रस्य बहुवैशिष्ट्यं वर्तते।

**विखनस् शब्दविचारः**

विखनसं ब्रह्माणं वेत्ति तपसा इति वैखानसः।

विखना नाम कश्चिद् ऋषिः। उत नारायणः? नारायण एव केवलम्।

मुनिमात्रस्य वैखानसशब्दवाच्यत्वेन प्रतिपादनाभावात्। परमात्मनो नारायणस्य विखनो वैखानसादिशब्दवाच्यत्वं श्रुतिस्मृतिपुराणादिषु अवगम्यते।

विखनसं ब्रह्माणं वेत्ति तपसा । विखनस् + अण्

वैखानसा ये मुनयो मिताहारा जितव्रताः । तेऽपि मुह्यन्ति संसारे जानन्तोऽपि ह्यसत्य- ताम् ॥

**"साध्या विश्वे च वसवो मरुतो ऋभवस्तथा ।**

**तथैवाङ्गिरसो रुद्रा आदित्याश् च तथैव च ।**

**एते देवगणाश् चाष्टौ मन्वन्तरगणेश्वराः ॥"**

**इति भृगूक्तानां साध्यादीनां ब्रह्मा। मुनीनां मुनिशब्दवाच्यानां विखनाः।**

**ब्रह्मणो मुनिशब्दवाच्यत्वं भारते चावगम्यते**

“निशां सुप्त्वाथ भगवान् क्षपान्ते प्रत्यबुद्ध्यत

विखना कश्चिदृषिः इति श्रूयते त

नारायणः पिता साक्षात् माता च हरिप्रिया।

भृग्वादि-मुनयः शिष्याः तस्मै विखनसे नमः।।

वैखानसं हि निगमः पांचरात्र तथागमः।

वैखानसश्रौतसूत्रविषयविचारः

| **प्रश्नः** | **विषयाः** |
|---|---|
| === | ==== |
| प्रश्न 1 | अग्न्याधेयः पुनराधेयः च |
| प्रश्न 2 | अग्निहोत्रः |
| प्रश्न 3 - 7 | दर्शपूर्णमासः |
| प्रश्न 8 9 | आग्रयणं चातुर्मास्यञ्च |
| प्रश्न 10 | निरूढपशुबन्धः |
| प्रश्न 11 | चरकसौत्रामणी |
| प्रश्न 12 – 16 | अग्निष्टोमः प्रवर्ग्यः |
| प्रश्न 17 | उक्थ्यः षोडशी अतिरात्रः अप्तोर्यामः वाजपेयः |
| प्रश्न 18 -19 | अग्निचयनम् |
| प्रश्न 20 | इष्टिविषयकप्रायश्चित्तम् |
| प्रश्न 21 | सोमविषयकप्रायश्चित्तम् |

वैखानसश्रौतसूत्रस्य परिचयः

अग्न्याधेयमग्निहोत्रं पौर्णमास्यमावास्ये।

नवेष्टिश्चातुर्मास्यानि पशुबन्धोऽत्र सप्तमः।

वैखानसश्रौतसूत्रे उखाविचारः - वैखानसश्रौतसूत्राध्ययेन ज्ञायते श्रौतयागेषु विशिष्टतया हविस्संस्थासु सोमसंस्थासु समस्तयज्ञक्रियासम्पादनाय आवश्यकता भवति।

शोधसारः - संसारे आवागमनप्रकल्पात् विमुक्त्यर्थं धर्मार्थकाममोक्षपूर्वकजीवनाय च सनातनजनानां लक्ष्यं वर्तते। वेदेषु प्रतिपादितसंस्कारश्रौतस्मार्तयज्ञानां सुसम्पन्नाय वैखानसश्रौतसूत्रस्य अध्ययनस्य अध्यापनस्य महती आवश्यकता भूमिका च वर्तते। अतः मया वैखानसश्रौतसूत्रे उखाग्निविचारः इति विषयमवलम्ब्य श्रौतसूत्रार्णवात् सङ्क्षिप्ततया प्रयासः आचरितः। शोधपत्रोऽयं वैखानसपरम्पराजनानां कृते महदुपकारको भविष्यतीति मे मतिः।

**धन्यवादः**

=====

सन्दर्भग्रन्थसूचिः

वैखानसश्रौतसूत्रम्

गोपथब्राह्मणम्

शतपथब्राह्मणम्

माण्डुक्योपनिषत्

श्रौतपरिचयः

वैदिकसाहित्य का इतिहास

मनुस्मृतिः

तैत्तिरीयभाष्यभूमिका